International Journal of Sanskrit Research 2018; 4(4): 73-75

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(4): 73-75
© 2018 IJSR
www.anantaajournal.com
Received: 04-05-2018
Accepted: 09-06-2018

**Sawant Rajendra Manikrao**
PGT Sanskrit, Kendriya Vidyalaya, Nanded, Maharashtra, India

**Correspondence**
**Sawant Rajendra Manikrao**
PGT Sanskrit, Kendriya Vidyalaya, Nanded, Maharashtra, India

# षोडशसंस्कारेषु व्यक्तित्वविचारः

**Sawant Rajendra Manikrao**

**प्रस्तावना**

व्यक्तित्वमित्युक्ते व्यक्तेः भावः इत्यवगम्यते। व्यक्ति इत्यनेन लोकव्यवहाराधारेण प्रत्यक्ष प्रमाणसिद्धः कम्बुग्रीवामान् कोऽपि पुरुषविशेषः स्त्रीविशेषो वा परिचीयते। शब्दस्यास्य व्युत्प-त्त्याधारेण तु वि उपसर्गात् अञ्ज् धातोः क्तिन् प्रत्यये कृते सति विशिष्टरूपेण प्रकटीभवति इति व्यक्तिः इत्यर्थोऽवबुध्यते। स्पष्टस्वरूपप्रतिपादनमेव व्यक्तेः शाब्दिकोऽर्थः। व्यक्तिशब्दः भेदः विवेचनं वा इत्यस्मिन् अर्थे कालिदासेन व्यवहृतः। यथा - तं सन्तः श्रोतुमर्हन्ति सद- सद्व्यक्तिहेतवः। (र.वं.१.१०), भगवद्गीतायां व्यक्तिशब्दः वास्तविकचरित्राद्यर्थे प्रयुक्तः। यथा - नह्येते भगवान् भक्तिं विदुर्देवा न दानवाः। (गीता.१०.१४), अमरकोषे च व्यक्ति- शब्दस्य पर्यायवाचीत्वेन स्पष्टं, स्फुटं, प्रव्यक्तम्, उल्वणम् इत्यादयः शब्दाः प्रतिपादिताः। यथा हि - स्पष्टं स्फुटं प्रव्यक्तमुल्वणम् इति।

**षोडशसंस्कारेषु व्यक्तित्वविचारः**

मानवजीवने संस्काराणां निर्वहणं स्वसमुदायस्य सामाजिकव्यवस्थानुसारमादर्शानुसारं चिन्तनानुसारं च भवति। मुस्लिमधर्मावलम्बिनः बिस्मिल्लाह सुन्नतं, पाणिग्रहणं, मृत्युकाले च संस्काराणां सम्पादनं कुर्वन्ति। इत्थमेव बौद्धाः अपि मेखलाः प्रवज्यः पाणिग्रहणम् इत्यादीनां सम्पादनमनिवार्यं मन्यन्ते। जैनाः अपि संस्काराणाम् आचरणाय बलं ददति। केषाञ्चन जनानामपि प्रमुखाः संस्काराः भवन्ति। इत्थमेव अस्माकं संस्काराः भारतीयसंस्कृतेः स्रोतांसि मन्यन्ते।

अस्माकं संस्कृतसाहित्ये चत्वारः वेदाः, वेदाङ्गानि (शिक्षा, कल्पशास्त्रम्, व्याकरणम्, निरुक्तम्, छन्दःशास्त्रम्, ज्यौतिषम् च) उपनिषद्ग्रन्थाः, संहिताग्रन्थाः, ब्राह्मणग्रन्थाः, आरण्यक ग्रन्थाः, गृह्यसूत्रग्रन्थाः, स्मृतिग्रन्थाः, पुराणानि, उपपुराणानि, रामायण-महाभारतादिग्रन्थेषु संस्काराणामुल्लेखाः समुपलभ्यन्ते। अनेके मनीषिणः विद्वांसाश्च संस्कृतसाहित्ये संस्काराणां वर्णनं कृतवन्तः। प्रामुख्येन षोडशसंस्काराः भवन्ति। ते च -

| | |
|---|---|
| १) गर्भाधानम् | २) पुंसवनम् |
| ३) सीमन्तोन्नयनम् | ४) जातकर्म |
| ५) नामकरणम् | ६) निष्क्रमणम् |
| ७) अन्नप्राशनम् | ८) चूडाकर्म |
| ९) कर्णवेधः | १०) उपनयनम् |
| ११) वेदारम्भः | १२) केशान्तम् |
| १३) समावर्तनम् | १४) पाणिग्रहणम् |
| १५) व्रतसाध्यापनम् | १६) शोधाधानम् |

यद्यपि भारतीयानां पुंसवनं, सीमन्तोन्नयनम्, जातकर्म, कर्णवेधः, उपनयनम्, वेदारम्भः, पाणिग्रहणादयः संस्काराः सर्वत्र भारते समानरूपेण अनुष्ठीयन्ते। आकाश्मीरतः कन्याकुमारी पर्यन्तम् इदमस्माकमेकीकरणसूत्रत्वेन स्वीक्रियते। यद्यपि कर्मकाण्डानुसारं संस्कारसम्पादन-प्रक्रियायां क्वचित् पार्थक्यं परिलक्ष्यते। तथापि एतेषामान्तरिकं वैशिष्ट्यमेकरूपत्वं च सर्वत्र भारते समानतयैव परिलक्ष्यते। इमे संस्काराः भारतीयसंस्कृतेश्चामूल्याः निधिरूपाः सन्ति। यद्यपि एतेषां संस्काराणां वर्णनं भारतीयसंस्कृतवाङ्मये विशदरूपेण दृश्यते तथापि एषां व्यक्तित्व-विकासे शैक्षिकं मनोवैज्ञानिकञ्च योगदानम् अनुसन्धानात्मिकदृष्ट्या सूक्ष्मेक्षणम् अद्यावधि केनापि विद्वद्वर्येण न विहितम्। एषामुपादेयता मनसोत्पद्यते। चेतनमनः, अवचेतनमनः, अचेतन-मनश्च अतीवमहत्त्वपूर्णं भवति। संस्कृतग्रन्थेषु मनसः तुरीयावस्थाया निरूपणमपि समुपलभ्यते परं पाश्चात्त्यैः मनोवैज्ञानिकैः अस्याः तुरीयावस्थायाः चित्रणं न विहितम्।

जर्मनदेशस्य मनो- वैज्ञानिकाः घरपीं रपव डलहश्रश्रशी इत्यादय इमाम् अवस्थां भावातीतसमाधिरूपेण स्वीकुर्वन्ति पाश्चात्त्यमनोवैज्ञानिकाः यथा सिगमण्ड् फ्रायड्, कोलहर, कोफ्का इत्यादयः मानसिकम् इदम्, अहं, परमोऽहं प्रभृतितित्त्वानां वर्णनं प्रामुख्येन विहितवन्तः। सुसंस्काराः एभिरुपर्युक्तैः तत्त्वैः सामाजिकवातावरणे समायोजनं स्थापयितुमुपयोगिनः भवन्ति। पुरुषस्य मनसो विकासावस्थासु शैशवकौमार्यकिशोरादिषु एषां संस्काराणामुपादेयता भूमिका व्यक्तित्वस्य उन्नयने महत्त्वपूर्णं स्थानं भजते। एभिः संस्कारैः व्यक्तित्वस्य सर्वाङ्गीण-विकासे शारीरिकं, मानसिकम्, आध्यात्मिकं, सामाजिकं, संवेगात्मकं, नैतिकं, व्यावहारिकं च विकासाय महत्त्वपूर्णं योगदानं भवितुमर्हति।

### १) गर्भाधानम्

ज्यौतिषशास्त्रानुसारं पाणिग्रहणादनन्तरं युवक-युवतिः, गर्भाधानसंस्काराय शुद्धश्वेत-वस्त्रधारणं कृत्वा दिवसे उपवासं समाचरेत्। सायङ्काले दुग्धं दध्योदनं तिलादिभक्षणं मिश्री-मिश्रितभोजनं कृत्वा रात्रौ समागमं कुर्यात्। रजस्वला स्त्री रजस्वलाकालादारभ्य दिवसत्रयं विहाय सुयोग्य-गुणवान्-मेधावी पुत्रप्राप्त्यर्थं समदिवसेषु तिथिषु च अर्थात् चतुर्थे, षष्ठे (अष्टमं दिनं वर्जितमस्ति), दशमे, द्वादशे, षोडशे च दिने, एवं प्रकारेण समतिथिषु द्वितीया, चतुर्थी, षष्ठी (अष्टमी तिथिं विहाय) दशमी, द्वादशी, चतुर्दशीषु च स्वभार्यायां गर्भाधानं समाचरेत्। पुत्री- प्राप्त्यर्थं विषमदिवसेषु पञ्चमे, नवमे, एकादशे, त्रयोदशे, पञ्चदशे एवं विषमतिथिषु पञ्चमी, सप्तमी, नवमी, एकादशी, त्रयोदशी, पञ्चदशी अपेक्षिताः भवन्ति। एषु दिवसेषु पुत्रप्राप्त्यर्थं पुरुषनाम्नः फलानां (यथा - अमरुद, आम, अनार, कदलीफल इत्यादीनां) एवं पुत्रीप्राप्त्यर्थं स्त्रीवाचकफलानां (यथा - मौसम्मी, लीची, आदिना) भक्षणं कर्तव्यम्।

### २) पुंसवनम्

अयं संस्कारः गर्भाधानादारभ्य सप्तममासस्य समाप्त्यनन्तरम् अष्टममासस्य प्रारम्भिक- दिवसे अस्य संस्कारस्य अनुष्ठानं विधास्यते। अस्मिन् अवसरे गर्भधारिका माता समुचित- परिधानम्, आभूषणानि परिधार्य शृङ्गारं कृत्वा स्वकुलपरम्परानुसारं श्रीगणेश-नवग्रहादीनां कुलदेवस्य च पूजनं यज्ञहवनं कृत्वा स्वसम्बन्धिकुटुम्बजनानां मित्रवर्गस्य कृते विभिन्नखाद्य-पदार्थानां, मिष्टान्नानां, सङ्गीतस्य, सङ्कीर्तनस्य च समायोजनं करोति। अनेन माता स्वस्थमनु-भवति एवं च तस्या उदरे शिशोर्मस्तिष्केऽपि प्रबलानां संस्काराणां बीजानि सूक्ष्मरूपेण आरो-पितानि भवन्ति। यादृशे वातावरणे माता तिष्ठति तस्य प्रभावः तस्या उदरे शिशोरुपरि अङ्कितं भवति। तत्कालिकवातावरणस्य, स्नेहसिक्तव्यवहारस्य, आचरणस्य, अन्यगुणानामङ्कनमपि शिशुमस्तिष्के सूक्ष्मचिह्नरूपेण चिह्नितं भवति। महाभारते यदा अर्जुनस्य भार्या सुभद्रा गर्भवती भवति। तस्मिन् काले अर्जुनः स्वकीयभार्यां युद्धचक्रवेधनस्य प्रक्रियाविषये श्रावयति। परं सा यद्धचक्रभेदनस्य प्रक्रियाश्रवणकाले औत्सुक्यं प्रकटयति परं शनैः शनैः सा निद्रामुपेति। यदा अर्जुनः तं युद्धचक्रव्यूहात् बहिर्गमनस्य प्रक्रियां श्रावयति। तदा अस्य कथनस्य अङ्कनम् अभि-मन्युमस्तिष्के न भवति। परिणामतया युद्धकाले यदा कौरव-पाण्डवयुद्धे कौरवैः युद्धचक्रव्यूह-रचना समारचिता प्रभवत्। परिणामस्वरूपं च सः पञ्चत्वं गतवान्। इत्थं प्रकारेण सीमन्तसंस्कारः व्यक्तित्वविकासे महत्त्वपूर्णं योगदानं विदधाति। शुकदेवस्य कथा देवीभागवतपुराणे ईदृश कथनस्य पुष्टिं करोति।

### ३) सीमन्तोन्नयनम्

पुंसवनानन्तरमवसरप्राप्तं सीमन्तस्य केशविन्यासस्य उन्नयनं पृथक्करणं क्रियते। अयं संस्कारः गर्भसद्भावे एव भवति। तत्र सीमन्तोन्नयनं प्रथमे आद्ये गर्भे गर्भधारणात् षष्ठे मासे अष्टमे मासे वा भवति। तिलमुद्गैर्मिश्रितम् ओदनं दीयते गर्भिण्यै। ततः सा सीमन्तमूर्ध्वं वितयति, केशललाटयोः सन्धिस्थानमारभ्य केशान् पृथक्करोति, द्वैधी करोतीति। अथ वेण्यां बन्धनानन्तरं स्वहस्ते वीणां गृहीत्वा गीतं गायति।

### ४) जातकर्म

जन्मकाले बहुप्रकाराणां देवीदेवतानां कुलदेवतायाश्च पूजनं कृत्वा शिशुं मातरं च स्नानं कारयित्वा वस्त्रधारणं क्रियते।

### ५) नामकरणम्

अस्य सम्पादनमपि मुहूर्तानुसारं भवति। नामकरणं बालकस्य जन्मकालस्य समय- चक्रानुसारं जन्मनक्षत्रे निर्दिष्टाक्षराणामनुसारं बालकस्य माता-पितरौ परिवारस्य सदस्याः मिलित्वा नवागन्तुकसदस्यरूपेण विराजमानस्य शिशोः नामकरणं कुर्वन्ति। विविधप्रकाराणाम् उत्सवानाम् आयोजनमपि भवति।

### ६) निष्क्रमणम्

अनेनापि बालकस्य विकासे योगदानं भवति। इत्थमेव निष्क्रमणसंस्कारः सुमुहूर्तानुसारं विधीयते। शिशुः गृहात् बहिरपि नीयते।

### ७) अन्नप्राशनम्

प्रायः नवम-दशममासे जातस्य बालकस्य दन्तानामुदयः भवति। सुमुहूर्तानुसारं श्रीगणेशदेवीदेवतानां कुलदेवतानां च पूजनानन्तरं यज्ञ-हवनक्रियां सम्पाद्य सम्बन्धि-कुटुम्ब- जनानां प्रीतिभोजनं कारयित्वा अन्नप्राशनसंस्कारः अनुष्ठीयते।

### ८) चूडाकर्म

चूडाकर्मसंस्कारस्य चौलाख्यं कर्म इत्यपि नाम। सांवत्सरिकस्य कुमारस्य चूडाकरणं चौलाख्यं कर्म कुर्यात्। अथवा यस्य बालकस्य त्रीणि वर्षाणि अतीतानि तस्येदं कर्म भवति। तत्र शुभे दिने त्रीन् ब्राह्मणान् भोजयित्वा माता स्वबालकं हस्ते गृहीत्वा स्नाययित्वा ततः शिवः नामेति मन्त्रेण लोहक्षुरं ताम्रपरिष्कृतम् आयसं क्षुरमादाय दक्षकरेण गृहीत्वा ब्राह्मणः क्षुरं कुश-तरुषान्तर्हिं तेषु केशेषु संलागयति स्थापयति।

### ९) कर्णवेधः

तदनन्तरं माता-पितरौ स्वशिशोः कर्णवेधसंस्कारं कुर्वन्ति। अनेन कर्णिकानाड्यां रक्त वेगस्य अवरोधः दूरे भवति। कर्णाभूषणधारणेन बालक-बालिकानां सौन्दर्ये अभिवृद्धिः भवति। इत्थं बालकस्य बाह्याभ्यन्तरिकव्यक्तित्वविकासे योगदानमपि परिलक्ष्यते।

### १०) उपनयनम्

पञ्चमे अष्टमे वा वर्षे बालकस्य उपनयनसंस्कारः समाचर्यते। उपनयनम् गुरोः समीपे गमनं भवति। गुरुः बालकं सम्यग्रूपेण परीक्ष्य आगतशिष्यस्य उपनयनसंस्कारं विदधाति। आगतस्य शिष्यस्य बहुप्रकारेण परीक्षणं करोति। यदि बालकः जिज्ञासुः भवति तस्मिन्नेव स्थितौ सः बालकं विद्यादानाय गृह्णाति।

**गर्भादष्टमेऽष्टमे वाऽब्दे ब्राह्मणस्योपनायनम्।**
**राज्ञामेकादशे सैके विशामेके यथाकुलम्।। (याज्ञ.स्मृ.१.१४)**

अर्थात् ब्राह्मणबालकस्य गर्भाष्टमे वर्षे, क्षत्रियस्य बालकस्य गर्भाद् एकादशवर्षे, वैश्यस्य गर्भाद् द्वादशवर्षे यज्ञोपवीतसंस्कारः कर्त्तव्यः। वृद्धवसिष्ठसंहितायामप्युल्लेखः अस्ति।

**मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला।**
**क्षत्रियस्य तु मौर्वी ज्या वैश्यस्य शणतान्वती।। (मनु.२.४२)**

पुनश्च

**विप्राणामुपनयनं वसन्तसमये धराधिनाधानाम्।**
**ग्रीष्मर्तौ शरदि विशां मासाः साधारणा मं च मायाद्यः।।**

अर्थात् ब्राह्मणानां मौञ्जीबन्धनं (उपनयनं) गर्भाधानतः अथवा जन्मतः अष्टमे वर्षे कर्त्तव्यम्। क्षत्रियाणाम् एकादशे वर्षे, वैश्यानां द्वादशे वर्षे कर्त्तव्यम्।
ब्राह्मणानां वसन्तर्तौ, क्षत्रियानामुपनयनं ग्रीष्मर्तौ, वैश्यानामुपनयनं शरदृतौ कर्त्तव्यम्। अन्येषां सामान्यजातीनां कृते उपनयनं वर्ज्यमस्ति। यदि तेषाम् उपनयने रुचिः स्यात् तदा जन्मतः पञ्चमे वर्षे कर्त्तव्यमिति।
उपनयनकाले गुरुः शिष्यं गर्भं धारयति अर्थात् यथा मातुः स्वगर्भे शिशोः रक्षणं पालनं पोषणं करोति तद्वत् गुरुः स्वशिष्यस्य आश्रमे पालनं रक्षणं भरणपोषणं च करोति स्म। प्रायः द्वादशवर्षाणि यावत् शिष्यः गुरुगृहे निवसति स्म। सः गुरोः सुश्रूषां सेवां यथा गोसेवां, भिक्षाटनं, पूजार्थं पुष्पचयनं, यज्ञयागादीनां समिधानयनम्, गृहकार्याणि करोति स्म। सः पारिवारिकसदस्य रूपेण गुरुकुले आश्रमे वा वसति स्म। आश्रमस्य स्थापनं नदीतीरे सौम्यारण्ये यत्र कन्दमूल-फलानि प्राचुर्येण उपलब्धानि भवन्ति तत्रैव भवति स्म। एवं वातावरणमनुकूलं भवति स्म। गुरोः समीपे तिष्ठन् बालकः गुरोः आचरणस्य अनुकरणं मूकरूपेण अपि स्वतः प्राप्नोति स्म। इत्थं प्रकारेण उपनयनसंस्कारस्य बालकस्य आन्तरिकबाह्यव्यक्तित्वस्य सर्वाङ्गीणविकासः अर्थात् शारीरिकं, मानसिकम्, आध्यात्मिकं, सामाजिकं च भवति स्म।

### ११) वेदारम्भः
यज्ञोपवीतधारणादनन्तरं गायत्रीमन्त्रस्य दीक्षा भवति। वर्णमालायाः ज्ञानादनन्तरं वेदारम्भः कण्ठस्थीकरणविधिना आचरिष्यते। प्रथमं गुरुः वेदमन्त्राणामुच्चारणम् उदात्तानुदात्त-स्वरितस्वराणां ज्ञानेन स्वयं करोति अनन्तरं शिष्येभ्यः कारयति स्म। मन्त्राणां शुद्धोच्चारणं प्रति गुरुः जागरूकः भवति। यावत्पर्यन्तं शिष्यः पूर्वदिवसे पाठितं पाठं सस्वरं न श्रावयति तावत्पर्यन्तं गुरुः अग्रे न पाठयति स्म। तस्मिन् काले पारायणविधिः महत्त्वपूर्णः आसीत्।

### १२) केशान्तः
माता-पितरौ बालकस्य सुमुहूर्तं दृष्ट्वा सम्बन्धीन् मित्रान्, ब्राह्मणान् आहूय श्रीगणेशादि देवानां कुलदेवस्य च पूजनं कृत्वा केशान्तसंस्कारं कुर्वन्ति स्म। बालकस्य केशाः सुरक्षिताः भवन्ति। यतो हि पाणिग्रहणकाले तेषां मस्तके शिरसि स्पर्शः शुभदः भवति। वातावरणम् अस्मिन्नवसरे सुखदं भवति। अनेन बालकस्य सुखं भवति स्म।

### १३) समावर्तनम्
शिष्यः गुरुकुले आश्रमे वा द्वादशवर्षाणि यावत् प्रायः निवसति स्म। कदाचित् चतु-र्विंशतिवर्षाणि यावदपि अन्तेवासीरूपेण तिष्ठति स्म। वेदानां वेदाङ्गानाम् अभीष्टदर्शनशास्त्र-स्मृतीनां पठनानन्तरं समावर्तनसंस्कारः आचर्यते। उपनिषत्कालीनसमावर्तनसंस्कारस्योल्लेखः तैत्तिरीयोपनिषदि एकादशेऽनुवाके उपलभ्यते। आचार्यः अन्तेवासिनमनुशस्ति - सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यैः न प्रमदितव्यम्। स्वाध्याय-प्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि। यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि। ये के चास्मच्छ्रेयाः सो ब्राह्मणाः। तेषां त्वयासनेन प्रश्वसितव्यम्। श्रद्धया देयम्। अश्रद्धया न देयम्। श्रिया देयम्। भिया देयम्। संविदा देयम्। अथ यदि ते कर्म विचिकित्सा वा वृत्तिविचिकित्सा वा स्यात् ते यत्र ब्राह्मणाः समदर्शिनः स्युः। युक्तायुक्ताः। अलूक्षा धर्मकामाः स्युः। यथा ते तत्र वर्तेरन् तथा तत्र वर्तेथाः। एष आदेशः। एष उपदेशः। एषा वेदोपनिषद्। एतत् अनुशासनम्। एवमुपासितव्यम्। एवञ्चैतदुपास्यम्।

उपनिषत्काले प्रवर्तमानस्य उत्तरकाले अपि व्यवहारे अनुवृत्तिः अभूत्। सः व्यवहारः अद्यत्वे अपि प्रवर्तत एव। डा. राधाकुमद्मुखर्जी महोदयेनायं समावर्तनसंस्कारसमारोहः (उपीेंलरींळेप) दीक्षान्त-समारोहेण परितोलितोऽस्ति। तन्मते आधुनिकविश्वविद्यालयेषु प्रचलितः दीक्षान्तसमारोहः समावर्तनमेवास्ति। अस्य संस्कारस्य वैशिष्ट्यम् अनेन परिलक्ष्यते यत् विश्वस्य प्रसिद्धे आक्सफोर्ड विश्वविद्यालयेऽपि दीक्षान्तसमारोहे उपर्युक्तानि वाक्यानि अद्यावधि उपदिश्यन्ते। वस्तुतः समावर्तनं दीक्षान्तो भवति। अद्यत्वे विश्वविद्यालयेषु शैक्षिकसंस्थासु च दीक्षान्तसमारोहः प्रचलितः तत्र स्नातकेभ्यः उपाधयः वितीर्यन्ते। उपाध्यलङ्करणावसरे तैत्तिरी- योपनिषदि शिक्षावल्ल्युल्लिखितोपदेशान् कुलपतयः (आचार्यः) स्नातकेभ्यः उपदिशन्ति। अनेन प्रकारेण समावर्तनसंस्कारः अद्यत्वे काले दीक्षान्तसमारोहः भवति। अनेन शिष्येभ्यः आचार्यः व्यावहारिकसामाजिकीञ्च शिक्षां ददाति। यतोहि मनोविज्ञानमधुना न तु मानसिकं विज्ञानं, न च आध्यात्मिकविज्ञानम्, न च चेतनस्य विज्ञानमस्ति। इदं मनोविज्ञानं जे.बी.वाटसन् महोदयेन व्यवहारस्य विज्ञानमुद्घोषितम्। अस्माकं छात्रेषु पुराकालतः अस्योद्घोषः आसीत्। इत्थं बाह्याभ्यन्तरिकव्यक्तित्वस्य उन्नयने उपनयनसंस्कारस्य शैक्षिकं मनोवैज्ञानिकञ्च योगदानं परिलक्ष्यते।

### १४) पाणिग्रहणम्
पाणिग्रहणस्य महत्त्वं सर्वोपरि भवत्येव। यतो हि अनेन वंशपरम्परा सुरक्षिता भवति एवञ्च मानवस्य शारीरिक-मानसिककामनायाः शमनमपि भवति। अयं संस्कारः युवानां युवतीनां च कृते यौवनावस्थाप्राप्ते सति आचरिष्यते। जन्मकुण्डल्यामुल्लिखितानां ग्रहाणां मेलनेन गुणानां बाहुल्येन (न्यूनातिन्यूनाः अष्टादशगुणाः अनिवार्याः भवेयुः), राशिमित्रता, नाडीदोषरहिता, युवकयुवत्योः पाणिग्रहणं शुभमुहूर्तानुसारं क्रियते। यदि युवकः युवतिं प्रति आकर्षितः भवति तदा चन्द्रमा प्रबलः भवति तदा तयोः पाणिग्रहणं शुभदं भवति। तत्र श्रीगणेशादि देवानां कुल-देवतानां पूजनं, वैदिक-पौराणिकमन्त्राणामुच्चारणेन यज्ञ-हवनादि कर्मकाण्डस्य क्रियायां सम्पा-दनानन्तरं सप्तपदी भवति। यत्र वर-वधू प्रतिज्ञाबन्धनम्, अग्निसन्निधौ सम्बन्धिनः मित्रवर्याणाम् अन्यानां सामाजिकजनानां समक्षे सप्तपदी प्रतिज्ञा वरवधूद्वारा अनुष्ठीयते। जीवनपर्यन्तं ते ऐक्य-सूत्रेण ग्रथिताः भवन्ति। पुरुषः अर्धः भवति। स्त्री अपि अर्धा भवति। उभौ मिलित्वा पूर्णौ भवतः। स्त्रीपुरुषयोः मेलनं भवति। इत्थं भारतीयसंस्कृतेः पाणिग्रहणेन पारस्परिकविश्वासस्य आस्थायाः बीजानि सशक्तानि भवन्ति। मानवस्य जीवनं द्विचक्रिकायामाधारितं भवति। इत्थं पाणिग्रहणस्य अपि आन्तरिकबाह्यव्यक्तित्वविकासाय शैक्षिकं मनोवैज्ञानिकञ्च योगदानं भवत्येव।

### १५) व्रतसाध्यापनम्
अयं संस्कारः षष्टिः (६०) वर्षादनन्तरमाचर्यते। यदा प्रौढः षष्टिवर्षाणि आयुष्यं धारयति तदा स वृद्धावस्थां प्राप्नोति सः ब्रह्मचर्येण निवसन् जीवनयापनम्, ईश्वरचिन्तनं कुर्वन् आत्म- साक्षात्कारे संलग्नो भवति।

### १६) शोधाधानम्
अयं संस्कारः अन्तिमसंस्कारः भवति। मानवः स्वकर्मानुसारम् अन्तमते सो गते अनुसृत्य परमात्मना सह ऐक्यं स्थापयति उत वा स्वर्गप्राप्तिं करोति। अन्त्येष्टिदाहकर्म इत्यादीनां क्रियाणां सम्पादनं शास्त्रानुसारमनुष्ठीयते। प्राचीनभारतीयशिक्षायाम् उपर्युक्तप्रकारेण बालकस्य गर्भाधानादारभ्य शैशवावस्था, कौमार्यावस्था, किशोरावस्थायाः विकासः षोडशसंस्काराणां व्यक्तित्वविकासाय शैक्षिकं मनोवैज्ञानिकञ्च योगदानं परिलक्ष्यते।